नं० ६१६-घ

(धर्मशास्त्रम्)

माधवीयतिथिनिर्णयः / कालनिर्णयः

पत्राणि १४ (जीर्णम्)

नं० ५१५-घ

१४ पत्राणि
जीर्णानि

माधवीरुग्विनिश्चयः

॥८॥ स्वस्तिश्रीगणेशाय नमः ॥ व्याख्याय माधवाचार्यो धर्म्मान्पाराशरानथ ॥ तदनुष्ठानकालस्य निर्णं
यं वक्तुमुद्यतः ॥ व्यामूढानामितस्ततनुस्तनुतां जाडु वीतेर्थमेकं विद्यातीर्थप्रसूति विमलं सद्विवेको द
सर्वेषां तत्प्रथममसुखदं तारतीतीर्थमाद्यं ॥ तद्दृष्ट्वा कामो विमलमनसा निर्ण्णयेत्रातिकिरस्मिं ॥३॥ प
नुकम्पते ह्लोकैरखिलैर्निहीनैर्निषितैः ॥ तावत्तैवानुतिष्ठासुर्निःसंदेहाः प्रवर्त्ततां ॥ ततो मीमां
स्यसमाधानाय तत्पुनः ॥ विचारयिष्यप्राज्ञ यंश्रुतिस्मृतिवचोवलात् ॥ पंचप्रकरणान्यत्र ॥४॥
शृतवत्सरे ॥ अन्येकाले शुमुख्यत्वमुक्तमेतत्तु तुर्यमिति ॥ प्रथमेतावदादौ सांख्यमतमास्थ
लत्राद्वावाच्यः ॥ कश्चित्पदार्थो नास्तीति पूर्वपक्षो ह्यत्पवैशेषिकमतमास्थायतत्सद्भावः ॥ प्र
तः ॥ द्वितीये तु तस्य कालस्य ज्योतिःशास्त्रादिसिद्धवादनिर्णयन्नमात्रं क्यकस्तेगवाव

सिद्धत्वाद्वा।निर्णयश्चैवं तदिति॥ द्वितीये कर्मणामुपक्रमोपसंहारयो —र्नैमीयत्वेन नित्यकालस्य कर्मांग
त्वं दर्शितं। चतुर्थे न्यस्य कालस्यास्य रूपतया संवत्सरो मुख्यः निमेषाद्यायुतमन्वंतरा --- द्याश्रयत्वा
दुपसर्जनीभूता इत्युक्तं द्वितीयप्रकरणप्रतिपाद्यं पंचविधमनुक्रामति॥ अयनर्तुमासाश्चपक्षाः प्र
करणांतर इति॥ तेषु पंचसु वत्सरस्यावान्तरविभागं तद्विनियोगं च दर्शयति॥ एवं पंचविधेष्वाद्यव्र
तादौ तिलकादिके। सुजन्मादिव्रते सौरो गौणः चान्द्रादिषु सावनः॥ त्रयोप्याचार्यसेवादौ विकल्प्यंते निजेच्छया। आद्ये
ऽयेतु नाक्षत्रो बार्हस्पत्योधिवत्सर इति॥ चांद्रः सौरः सावनो नाक्षत्रो बार्हस्पत्य इति संवत्सरः पंचविधः॥
तिलकव्रतं भविष्यत्पुराणोक्तं तिलकादावित्यनेनादिशब्देनानंतव्रतं विवक्षितं व्रतादावित्यादिशब्देनानि
रूढः॥ पंचबंधः सुजन्मावाप्तिव्रतं विष्णुधर्मोत्तरे दर्शितं॥ आदिशब्देन गणेशचतुर्व्रतकौडइव्यवं॥ गोस
गावोना प्रत्नसत्रमासते स्यादिब्राह्मणेषु समासात। आदिशब्देनासर्पिणामधपयानं गृह्यते आचार्यसेव

२

घ

र्थिनां माचार्यं प्रसादयितुं माघवीणिकैः समाम्नाता ॥ अथादिशब्देनाषणिके तु कं अयनांगं त्रिषवणस्नानादि
गृह्यते ॥ नाक्षत्रो ज्योतिःशास्त्र उपयुज्यते अधिमासवदधिवासरस्य देवताप्रतिष्ठादौ वर्ज्जनीयतया तत्संबंधेन
र निर्णये बार्हस्पत्य उपयुज्यते ॥ चांद्रसंवत्सरस्यावांतरभेदं तद्विनियोगं चाह ॥ चांद्राणां प्रभवादीनां ॥ प
वके पंचके युगे। संपरीदान्विदित्येतच्छब्दपूर्वास्तु वत्सराः ॥ तिलो यवो वस्त्रं धान्यं रजतं देयं तेन चेति ॥ प्रभ
वः संवत्सरः विभवः परिवत्सरः शुक्ल इदावत्सरः ॥ प्रमोनुवत्सरः प्रजापतिरिद्वत्सरः ॥ एतत्पंचकमेकं युगं
न क्रमेण तिलादिकं देयं। धान्यशब्देन तिलयवव्यतिरिक्तं व्रीह्यादिकं विवक्षितं ॥ अयनयोर्विभागेन विनियो
गमाह ॥ उग्रे कर्म्मणि शांते च अयने दक्षिणोत्तर इति ॥ मासेष्वेव देवताद्युग्रदेवताप्रतिष्ठायां दक्षिणाय
नं ग्राह्यं ॥ शिवविनायकादिषूत्तरायणं ग्राह्यं ऋतुविभागेन विनियोगमाह ॥ वसंताद्याः ऋतवो द्वेधा। चां
द्राः सौराश्च वंइगाः चैत्राद्या अथ मीनाद्या मेषाद्या वा विवस्वतः ॥ तेष्वाधानादयस्तद्वत् यन्मूर्त्तिव्रतपूजा

ते२५ =दर्शांतः ३५

मेष

ति ॥ चैत्रवैशाखमासौ चांद्रौ वसंतऋतुः मीनमेषमासौ वृषभमासौ वा सौरः ॥ एवं ग्रीष्मादिषु द्रष्टव्यं वसंते ब्राह्मणो
ग्नीनादधीतेत्यादिषु सिद्धं वसंतादिषु क्रमेण षण्णां देवतामूर्तीनां पूजा विष्णुधर्मोत्तरे दर्शितामासानां विभागं वि
नियोगं वा हि ॥ मासास्तु सावनः सौर चांद्रो नाक्षत्र इत्यमी ॥ दर्शांतः पूर्णिमासांतो वा चांद्रस्तौ विषुवेत्रपयोः
सौरो राशौ यावन स्व यज्ञे ज्योतिषिके परः ॥ माघादिमासस्तेदेषु । तिलदानादयः स्मृताः । इति सप्तः धिः । चांद्र
मासेकं विद्विशेषमाहा ॥ चांद्रोधिमासो संक्रांतः सांतस्तेवतिचोत्तरे । द्विसंक्रांतावेकवर्षे द्वौ वत्संसर्पः पादिमंधी
क्षयमासो द्विसंक्रांतः स च बृहस्पतिसंज्ञकः । त्रयस्त्याज्या विवाहादौ संसर्पांहस्पती उभे ॥ शुद्धौ मैत्रातीतयाः स्मार्त्ते
मलमासो विविच्यते । संक्रांतिरहितश्चांद्रो मासाः संवत्सरावयवस्यः संक्रांतियुतः स्यैवेत्रादिद्वादशमासस्यो निरि
क्तत्वादधिक इत्युच्यते ॥ स च संक्रांतियुतोनंतरमासोतातला वा तत्रामस्मावप बहत्वं ॥ यदा त्वेकस्मिन् संवत्सरे द्वौ वसंक्रां
तमासौ प्राप्नुतस्तदानीं तयोर्मध्ये उत्तरमास एवाधिमासः पूर्वस्तु संक्रांतिरहितोपि नाधिमासः ॥ किंतु संसर्प

धं
३

हस्पुच्यते ॥ यदि द्विसंक्रांतिमासः० कदाचित्स्यान्नुयात् तदानीमसौ ह्वयमासद्वयं बृहस्पतीरित्थं शास्त्रेव्यवहृ
यते ससंसर्पः । बृहस्पतिरधिमासः इत्येतेनयोऽन्यपातिः शास्त्रे विवाहादौ वर्ज्यते ॥ अतस्मान्नैकाम्यादिषु कर्मि
सुसंसर्पःतु द्वस्तथा बृहस्पतिरपि ॥ अधिमासेतु अतस्मान्तु विषयस्य विवेचनीयस्य दुर्बलत्वात्तद्विवेकः० प्रयकु
प्रतिज्ञायते । तत्र वर्ज्यं विविनक्ति । काम्यारंभं तत्समाप्तिं मलमासे विवर्जयेत् । इति ॥ एनं तल्लक्ष्मीव्रतादिकं
काम्यं क्वचित्तु काम्यस्यापि समाप्तिमंगीकरोति । प्रारब्धं मलमासात्प्राक् कृच्छ्रसत्रादिकं च यत् ॥ तत्समाप्य
सावनस्य मानस्यानतिलंघनादिति ॥ द्वादशाह्निदिवससाध्यं प्राजापत्यं कृच्छ्रं त्रिंशद्दिनसाध्यं चान्द्रायणं
तथा त्रयोदशरात्रादीनां सत्राणां द्विरात्राणां द्विरात्रादीनाँ मावत्स्वरूपकानां च शाखोक्तदिवससंख्यातस्याच्च
लंघयितुमशक्यत्वात् कृच्छ्रादिसमाप्तिरवश्यंभाविनी । आरंभसमाप्तिवदनुष्ठानमपि वर्जनीयमित्यारं
कथाह ॥ आरंभस्य समाप्तेश्च मध्यस्यापि मलिम्लुचः० ॥ प्रवृत्तमखिलं काम्यं तदानुष्ठेयमेवतु ॥ इति ॥ एतद

वत्रिंशाःऽश्रावणादिष्वधिमासेष्वपि चातुर्मास्यव्रतान्यनुतिष्ठंति। यथा विषयविशेषेण मलमासे समाप्तिरनुष्ठा
नं वा स्युः पेयेतेतथा प्रारंभोपि क्व विदल्लुप्येयतइत्याह॥ करोयादितु यक्काम्यं तस्यारंभसमापने कार्ये कालविलंब
स्य प्रतीक्षायाः प्रसंगत्वादिति॥ कारीयाद ग्ष्टिकामोयजेतेति कारीरी विहिता॥ आदिशब्देन ग्रहग्रस्तेनि किंचित्तु। वि
हिता रक्षोघ्नेष्टिरिष्टी ताः तत्र यदि मलमासमपनेतुं कालविलंबप्रतीक्ष्येत। तदास्यानिष्टाः प्रयुः। ग्रहग्रस्तो म्रियेत च। का
म्यकर्मस्विव नित्यकर्मस्वपि वृद्ध्या वृद्ध्या विश्लाषं गं दर्शयति॥ प्रनन्यगतिकं नित्यमग्निहोत्रादि न त्यजेत्॥ गत्यंतरयुतं नि
सोमयागादि वर्जयेदिति॥ प्रतिदिनं सायं प्रातर्विहितस्याग्निहोत्रस्याकरणे प्रत्यवायादनन्यगतिकत्वं॥ आदिशब्देन द
सो शपूर्णमासेष्टिर्गृह्यते। सोमयागस्य वसंतऋतौ विहितस्य शुद्धमासे पि विधातुं शक्यत्वाद्गत्यंतरयुतत्वं॥ आदिशब्देन
न्यदायिकर्तुं श्राद्धको निरूढपशुबंधो गृह्यते। नित्यकर्मन्यायं नैमित्तिकेप्यतिदिशति॥ प्रगतिग्रहणस्नानं जातेष्टि
रिति संयुता द्वयं नैमित्तिकं तस्य मलमासस्थानि त्यवन्नते मलमासे प्राप्तस्य ग्रहणस्य शुद्धमासे संपादयितुमशक्य
त्वात्॥ प्रगतिर्वं वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जात इति विहिता ज्ञानेष्टिस्तस्याश्च शुद्धमासे प्राप्तस्य प्र

णस्यत्वाद्ब्दमासेपिकर्तुंशक्यत्वात्।गतियुक्तातुमलेस्याद्दाब्दिकोत्तरंमलमासरहितेत्वेद्वैशाखेमासेमृतस्याब्दययुपरितनसंव
त्सरेऽधिकमासेवैशाखेप्रथमंप्रत्याब्दिकंप्राप्नुयात्तदाकर्तव्यमेव।अधिकवैशाखेमृतस्यतुप्रथमंप्रत्याब्दिकंसर्वथानाधि
मासेप्राप्नोति।किंत्वाब्दिकोत्तरंयदाकदाचिदधिमासेप्राप्नोतियदातत्कर्तव्यमेवउभयोरपिनत्वाद्ब्दमासेप्रत्याब्दिकंक
र्तव्यं॥मलमासेयानिकार्याणिदर्शकारउदाहरत्।कार्याकार्याणिसंगृह्यतान्यत्रव्याहरामहे।द्वादशाहंसपिंडांतं।कर्म
ग्रहणजन्मनोः॥सीमंतेपुंसवेश्राद्धंद्वावेतौजातकर्मच।रोगेशांतिरलभ्येचयोगेश्राद्धंव्रतानिच।प्रायश्चित्तंनिमित्तस्य
वशान्पूर्वेपरत्रवा॥अब्दोदकुंभंमन्वादिमहालययुगादिषु।श्राद्धंदर्शेपिहरहःश्राद्धमूनादिमासिके।मलिम्लुचान्यमा
सेषु।मृतानांश्राद्धमाब्दिकं॥श्राद्धंतुपूर्वेद्युरेष्वेतौयद्येवयुगादिषु।मन्वादिषुचयद्दानंदानंदेवंद्विजंचयत्॥तिलगोभू
हिरण्यानांसंध्योपासनयोःक्रिया।पर्वहोमश्चाग्रयणंसांगुलिव्यष्टिश्चपर्वणः।नित्याग्निहोमेसोत्रेसोमश्चदेवतातिथिपू
जनं।स्नानंचस्नानविधिनानास्तद्यापेयवर्जनं॥तर्पणंचानिमित्तस्यनियमवाकुलयज्ञच।अनित्यमनिमित्तंचदानंच
महदादिकं॥अप्राधानावृत्पूर्वतोयियात्रामरेक्षणं।देवालयतडागादिप्रतिष्ठामौंजिवंधनं॥अथमस्वीकृतिः।

= नित्यत्वादुत्सवः । चेत्यंतेन ग्रंथेन ।

काम्यवृषोत्सर्गस्य निःक्रमः ॥ राजाभिषेकः प्रथमश्चूडाकर्मव्रतानि च ॥ = पन्नप्राशननमारंभो गमनं त्वाणि
च पर्वचत्राणं ॥ स्नानं विवाहो नामानि पत्रं देवमहोत्सवं व्रतारंभसमाप्ती चा ॥ काम्यं काम्यत्व पापघ्नः ॥ प्राय
श्चित्तं तु सर्वस्य मलमासे विवर्जयेत् ॥ उपाकर्मोत्सर्जनं च पलित्रदमनप्यपि ॥ = पवरोहश्चैते मंतः स
र्पाणां बलिरथकाः ॥ दृश्यानस्य बलि बिष्णोः शायनं परिवर्तनं ॥ दुर्गेंडस्थापनोत्थाने । धूनोत्थाने
च बर्जिताः ॥ पूर्वत्र प्रतिषिद्धानि यच्चान्यद्वैदिकमिति ॥ वादश्चोत्यारंभ्यं वर्जयेदित्यंतेन वर्ज्यसंग्रहः
= नित्यमनिमित्तं वेत्यारंभ्य वर्जयेदित्यंतेनावर्ज्यसंग्रहः ॥ उपाकर्मोत्यारभ्य परत्रान्यच्च वैदिकमित्यनेन मलमा
स वर्जितानां सतां ॥ शुद्धमासे = प्रवृत्तपः कर्त्तव्या चेन संग्रहः । मास विषयं कर्त्तव्यं परिसमाप्यययोर्विनियोगमा
ह ॥ ॥ देवे मुख्यः शुक्लपक्षः कृष्णः पित्र्ये विशिष्यत इतिस्पष्टार्थः प्रकरणांतरप्रतिपाद्यमर्थं संगृह्णाति ॥ ।
॥ त्रितीये तु प्रकरणे निर्णीता प्रतिपत्तिथिरितिसाधस्य प्रतिवादिनं प्रतिपद्यन्तु तिथि विशेषप्रवर्त्तयि
तुं प्रवृत्तिनिमित्तविशेषं विशेषमाह ॥ ॥ प्रतिपन्नाम विद्ध्याचंद्रस्य प्रथमा कला शुक्लपक्षे विशे

दृं त्समस्नपदे विनिःसरेत् ॥ इति ॥ विज्ञाया एव तिथेर्निर्णयं वं दर्शयितुं तिथिर्विलज्यते ॥ शुद्धावि
द्धा तिथिः शुद्धा तीना तिथ्यान्ययाहनि ॥ उदये पूर्वया तिथ्या विध्यते त्रमुहूर्तकैः ॥ सायंतनतरया तद्वत् न्यू
नया तु न विध्यते इति ॥ सूर्योदयमारभ्यास्तमयपर्यन्तः कालविशेषो हरित्युच्यते ॥ तस्मिन्नहनि पूर्वया तिथ्या
वमावास्यासंज्ञया उत्तरया च द्वितीयया संज्ञया तिथ्या तीना प्रतिपत् शुद्धेत्युच्यते कदाचित्सूर्योदया
दूर्ध्वं त्रिमुहूर्तया ऽमावास्यया संयुतास्ति कदाचित् सूर्यास्तमयादर्वाक् त्रिमुहूर्तया द्वितीयया संयु
ज्यते तादृशी द्वितीयापि प्रतिपद्विद्धेत्युच्यते मुहूर्तत्रितयन्यूनामावास्या द्वितीया वा तां प्रतिपदं वेद्धुं न शक्नो
ति ॥ यथा वेधिकयोरमावास्याद्वितीययोस्त्रिमुहूर्तैव नियमः ॥ तथा वेध्यायाः प्रतिपदोपि त्रिमुहूर्तैव नियम
ममाह ॥ ॥ वेध्यापि त्रिमुहूर्तैव न न्यूनावेधमर्हति ॥ पस्तमयादर्वाक् मुहूर्तत्रयसंयुता प्रतिपदमावास्यया
वेद्धुं युक्ता उदयादूर्ध्वं त्रिमुहूर्ता प्रतिपत् द्वितीयया वेद्धुं योग्या मुहूर्तत्रयरहिता तु पूर्वया परया वा ति
थ्या वेद्धुं योग्या न भवति ॥ यथोक्तयोः शुद्धविद्धयोर्मध्ये शुद्धाया निर्णयं वं दर्शयति ॥ ॥ शुद्धायां

नास्ति संदेहाद्देवपित्र्यचकर्म्मणि ॥ एवं च सति दैवे पित्र्ये च के बिषये विज्ञाया एव निर्ण्णयस्त्वं विशिष्य । तत्र च द्वयम
णविषये बुद्धिसमाधानाय दैवं पित्र्यं वितत्यानुक्रामति ॥ उपवासश्चैकभक्तं नक्तं अयाचितं व्रतं । दानं च षड्विधं दै
वं कर्मादत्र विविच्यते ॥ एकोद्दिष्टं पार्वणं च द्विविधं पित्र्यमुच्यते ॥ इति ॥ तत्रोपवासे प्रतिपदो निर्ण्णयमाह ॥ ॥ शुक्ल
पक्षे दर्शविद्धा कृष्णे विद्धा द्वितीयया ॥ उपोष्या प्रतिपच्छुक्ले मुख्या सा दापराह्णिकी ॥ तदभावे तु सायाह्नव्यापिनी परि
गृह्यतामिति ॥ शुक्लपक्षप्रतिपदमावास्याविद्धायाः ॥ सायाह्नव्यापित्वं ...पत्ता विसायाह्नादर्वाग् अपराह्णेपि क्रिय
ते यदि विद्येत तदा प्रशस्ता भवति ॥ तत्र सायाह्नापराह्णयोर्विवक्षितमर्थविशेषमवगमयितुं स्वाभिमतमह्नो विभागं दर्श
यति । प्रातः संगवमध्याह्नापराह्णाः सायमित्यसौ ... पञ्चाह्नः ॥ पंचधा भागो मुख्यो द्वित्रादिभागत इति पूर्वाह्णापराह्णावि ति
द्वावेवाह्नो भागावित्येके प्रातर्मध्याह्नसायाह्नास्त्रयो भागा इत्यपरे चत्वारः मुहूर्ततदेन पंचदश इति केचित्
एते चत्वारः पक्षाः श्रौतस्मार्तकर्मानुष्ठानविषया न भवंति तस्मात् प्रातः संगवमध्याह्नापराह्णसायाह्नाः पंचध
तानेंगेनुष्ठाने मुख्यः ॥ ...मा विद्धायां प्रतिपदि उपवासे संकल्पस्य कालमाह ॥ ॥ ...प्रस्तावे पि प्रतिपदः सं

प्रातरिष्यते इति पूर्वविद्धायामुपोषितस्य परेद्युः पारणव्यवस्थामाह॥ ॥ तिथिरन्त्यायामेतोर्बाकुर्वेत् तिथ्यंते पारणं स्व
यामत्रयाद्धूर्गामिन्यां प्रातरेव हि पारणमिति॥ यदा प्रतिपत्तिथिर्यामत्रयादर्वागेव संपरिसमाप्यते तदा तिथ्यंते पारणं यामत्रयद्धे
मनुवर्तनौ प्रातरेव हि पारणमिति॥ व्यवस्था उपवास विहितं तिथिनिर्णये शुक्लप्रतिपदि विहितबलि उत्सवप्रतिदिव्रताति॥
बल्युत्सवं तु पूर्वेद्युरुपवासवदाचरेत् इति। अपराह्नसंयुता मुख्या तदभावे सायाह्नव्यापिनी ग्राह्येत्यर्थः॥ शुक्लप्रतिपदि
पवासस्यानुकल्पमाह॥ ॥ मुख्यतिथ्यंतरायेतु तिथिरेषापि रक्ष्यतामिति। यद्यपि पूर्वविद्धायामुपवासो युक्तस्तथापि केन
चिन्निमित्तेनांतरायसति व्रतपरित्यागाद्वरं परेद्युरुपवास इत्यर्थः॥ शुक्लपक्षे पूर्वविद्धा प्रतिपदुपेक्ष्यति निर्णीत वाक्ये यं
परेद्युरुपनिर्णयः॥ पर्यवस्यति तस्य कचिदपवादमाह॥ ॥ शुद्धाधिकातु लभ्यापि पूर्वा संपूर्णत्वसंलवादिति॥ यदा पूर्वेद्युः
सूर्योदयामारभ्य परेद्युः सूर्योदयादूर्द्ध्वं वर्द्धिव व्रातमुहूर्तत्रयं प्रतिपद्वर्द्धते तदा लभ्यपक्षे वेन परेद्युः प्राप्तावपि तदपोह्य
पूर्वदिने उपवासः कर्तव्यः॥ इत्युपवासे प्रतिपन्निर्णीतिः॥ ॥ अपैकभक्तेनिर्णयमाह॥ ॥ गृहीतव्यावेकभक्ते मध्य
ह्नव्यापिनीति तिथिरिति मध्याह्नव्याप्तिरवांतरभेदानुपजीव्य व्यवस्थामाह॥ परेद्युरेव तद्व्याप्तिः पूर्वेद्युर्वा दिनद्वये॥ नोभ्त

ति

त्रास्त्य यत्रांशे साम्यवैषम्यं द्वत्यमी षट् पक्षास्तेषु चैकैक व्याप्तौ सैवात्र गृह्यते ॥ दिन द्वयेपि तद्व्याप्ताव व्यावेकदेशतः ॥ सम
प्तौ त्व पूर्वैव वैषम्ये न्वधिके व्यप्यतामिति । मध्याह्नं कृत्स्नं व्याप्नोतीति प्रथमः पक्षः मध्याह्नं कृत्स्नं न व्याप्नोतीति द्वितीयः पक्ष
स्तत्र कृत्स्नव्याप्तिस्त्रेधा त्रिघते । परेद्युरेव कृत्स्नं व्याप्नोति पूर्वद्युरेव कृत्स्नं व्याप्नोति उभयत्र कृत्स्नं व्याप्नोतीति । कृत्स्नाव्याप्तिर्द्वेधा
विधा व्याप्नोति एकदेशेन व्याप्नोतीति एकदेशाव्याप्तिश्च द्विधा समव्याप्तिर्विषमव्याप्तिश्चेति पूर्वद्युस्तु मध्याह्नस्य तस्यापरं भागं
व्याप्नोति परेद्युर्मध्याह्नस्य पूर्वभागं व्याप्नोतीति तयोर्भागयोर्न्यूनाधिकव्याप्तौ विषमव्याप्तिरुच्यते । तत्र कृत्स्नव्याप्तिपक्षास्त्र
यः स्पर्शपक्षश्चतुर्थः । अंशव्याप्तिपक्षौ द्वावित्येवं षट् पक्षाः संपद्यंते । तत्र परेद्युरेव कृत्स्नव्याप्तिरित्यस्मिन् प्रथमपक्षे पर
रेव ग्राह्या सर्वदिने कृत्स्नव्याप्तिरित्यस्मिन् द्वितीयपक्षे दिनद्वयेपि व्याप्तिरित्यस्मिन् तृतीयपक्षे दिनद्वये स्पर्शाभावे
चतुर्थपक्षे दिनद्वये समव्याप्तिरित्यस्मिन् पंचमपक्षेपि पूर्वैव तिथिरेव ग्राह्या । दिनद्वये विषमव्याप्तिरित्यस्मिन् ष
पक्षे त्वधिकव्याप्तिरेव ग्राह्या । त्रिविधमेकभक्तं । स्वतंत्रं व्रतरूपं प्रथमं । अन्यव्रतांगभूतं द्वितीयं उपवासप्रति
निधिरूपं तृतीयं । एतेषु प्रथमे तिथिनिर्णयो लिखितः । इदानीं द्वितीयतृतीययोर्निर्णयमाह । अन्यांगस्यैक

कालस्त्वंगप्यनुसारतः ॥ उपवासप्रतिदिनिषेधेस्तिथिः स्यादुपवासवत् ॥ इति ॥ स्वतंत्रैककर्तृकस्य मध्याह्नो मुख्यः कालः ।
स्तद्व्याप्तिमुपजीव्य तिथिनिर्णीता । अन्यांगस्य वैककर्तृकस्य पराधीनतया नास्ति स्वतंत्रः ॥ कर्मकालस्तिथिविशेषो वा व्रतग्र
नक्तव्रतानुसारेण कर्मकालतिथिविशेषो गृहीतव्यः ॥ उपवासप्रतिनिधेरेककर्तृकस्योपवासे या निर्णीता सैव ग्राह्या
नक्तन्यायेन नक्तेऽपि षट्पञ्चाशन्निप्रेतत्वाचितं निर्णयमाह ॥ ॥ प्रदोषव्यापिनी नक्ते तिथिर्व्याप्तिर्द्दिनद्वये । = पव्या
प्त्यभावांशेन व्याप्तिः स्यात्सैव यान्तरेति ॥ नक्तव्रते प्रदोषव्यापिनी ग्राह्या सत्तु क्वापूर्वेद्युरेव व्याप्तिः परेद्युरेव व्याप्तिरिति पक्षद्व
यान्निर्णीयमाह ॥ शेषपक्षचतुष्टये परतिथिरेव ग्राह्या कचित् प्रदोषव्याप्तेरपवादमाह ॥ सौरनक्ते तु सायाह्नव्या
नप्रदोषगेति ॥ उपवासतिथिनिर्णयमयाचितेतिदिशति ॥ = अयाचिते तु तिथयः स्वीकार्या उपवासवदिति । दानव्रतये
थिनिर्णयमाह ॥ ॥ सोदयत्रिमुहूर्त्ता या कुर्याद्दानव्रतानि च । उभयत्र तथात्वे तु पूर्वेद्युस्तदनुष्ठितिः ॥ परत्रैव तथात्वे
पूर्वा ग्राह्या तिथिक्षये । तिथेः साम्येऽथ वृद्धौ च ग्राह्यता मुत्तरा तिथिः ॥ = परस्य त्रिविकदेशस्य व्याप्तौ पूर्वैव ग्राह्यतामिति ॥ या ति
थिः पूर्वेद्युरुदयमारभ्य त्रिवत्सा सती वृद्धिवशात् परेद्युरुदयादूर्ध्वं विद्यमानापि मुहूर्तत्रयं न व्याप्नोति सा तिथिः पू
ग्राह्या । दिनद्वये सोदयत्रिमुहूर्त्तव्याप्तावपि पूर्वैद्युर्वयदा परेद्युः सोदयमुहूर्त्तत्रयं व्याप्नोति तदा ग्राह्यतिथिः वृद्धि

म्यक्षयाः परीक्षणीयाः॥ तत्र क्षये प्राप्ततिथिः पूर्वविद्धास्त्री कार्या वृद्धिसाम्ययोस्तु परविद्धा दिनद्वये सोदयत्रिमुहूर्त्तस्पर्शाभा-
वः एकदेशसमव्याप्तिर्विषमव्याप्तिरित्येषु पक्षेषु पूर्वैव ग्राह्या॥ उपवासादिके षड्विधे दे तिथिनिर्णीय पिक्षयवृद्ध्योरेकोद्दि-
ष्टस्य निर्णयमाह॥ ॥ एकोद्दिष्टस्य मध्याह्नयुक्ता स्यादेकवत्॥ एकदेशसमव्याप्तौ क्षये पूर्वान्यथा त्वपरेति॥ पत्रापि पूर्ववत्षड्विध-
त्वपक्षान् विविच्य दिनद्वये पूर्णसमव्याप्तिरित्येवं पंचमे पक्षे परित्यज्य वक्ष्येषु एकलक्षन्यायेन निर्णेतव्या पंचमपक्षे ग-
स्पतिथेः वृद्धिसाम्ययोर्निर्णयः॥ ॥अथ पार्वणादिकस्य निर्णयमाह॥ ॥कुतपाद्यपराह्णान्तव्याप्तिराद्धिके उत्त-
तदसावेपराह्णस्पव्यापिकां ग्रस्ततां तिथिः॥ क्षये पूर्वा तत्र वृद्धौ चेत्पूर्वा स्यात् कुतपौ वृषा॥ वैषम्येऽकदेशव्याप्तौ पूर्वा
महत्त्वतः साम्ये नवत् क्षये पूर्वापरा स्यात् वृद्धिसाम्ययोः वृद्धिसाम्यक्षयाः प्राप्ततिथिर्गा नोर्ध्वगा इहेति॥ ॥पाक्षा यमामुहूर्त्तः कु-
तपः छादशोनमुहूर्त्ते नापराह्णः समाप्यते॥ तथासति कुतपादिमुहूर्त्तपंचकव्यापिनीतिथिः। प्रत्याब्दिके ग्राह्या तदसावेवपरा-
ह्णव्याप्तिमुपजीव्य षट्पक्षा विवेचनीयाः॥ तत्र पूर्वेद्युरेव परेद्युरेव व्याप्तिरित्यनयोः पक्षयोर्निर्णयः स्पष्टः॥ उभयत्र व्या-
प्तेरित्यस्मिन् तृतीयपक्षे ग्राह्यतिथिरूर्ध्वगता वृद्धिसाम्यक्षयाः परीक्षणीयाः॥ तत्र क्षये सति प्राप्ततिथिः पूर्वविद्धास्त्री
कर्तव्या वृद्धिसाम्ययोस्तु परविद्धानुयदातु दिनद्वये पराह्णस्पर्शो नास्ति तदा यद्यपि परेद्युः कुतपकालव्याप्तिरस्ति तथा-

।त्यदित्यजपरूर्वविद्धैवग्राह्या॥अपराह्णैकदेशस्यापि सम्यग्व्याप्तिरित्यस्मिन् पक्षेऽपराह्णैकदेशत्वं निर्णेतुं॰ साम्यनैक
देशव्याप्तिरित्यस्मिन् पंचमे पक्षे ग्राह्य तिथिगता न वृद्धि साम्य क्षयान् परीक्ष्य क्षयपूर्वैव ग्राह्या।वृद्धिसाम्ययोस्तु उत्तरे निर्ण
यः॥ ॥प्रकरणांतरप्रतिपाद्यं संग्रहाति द्वितीयाद्यास्तु पर्वाताः तुर्य प्रकरणे दिताइति॥यथोक्तं दैवपित्र्याविषयं निर्णयं द्वि
तीयादिष्वतिदिशति संचारणेयः सामान्यतिथिषु प्रतिपन्नयइति।सामान्यन्यायस्यापवादं विवक्षुः प्रतिजानीते।क्वचित् क्वचि
द्विशेषोऽस्ति सोयमत्रालिखीयतइति॥प्रतिज्ञातं विशेषं दर्शयति॥पूर्वेद्युरसती प्रातः परेद्युस्त्रिमुहूर्तगा।सा द्वितीया परा
व्यापूर्वविद्धा ततापरेति॥यदा।द्वितीया पूर्वेद्युर्मुहूर्तत्रयात्मकं प्रातःकालं न स्पृशति परेद्युः प्रातःकालं व्याप्नोति तदा परविद्धै
वोपोष्या अन्यथा पूर्वविद्धा। तृतीयायां विशेषमाह॥रंभाव्रते तृतीया पूर्वा स्याद्वुत्तरा स्यात् व्रतांतरे परेह्नि नास्ति चेत्पूर्वा विद्धा स्तौ
स्तु व्रतांतरे॥मुहूर्तमात्रसत्वेऽपि दिने गौरीव्रतं परे तु शुद्धाधिकायामप्येवं गणयोगप्रशंसनादिति॥यद्यपि रंभाव्रत्या तिथि
व्रतेषु पूर्वविद्धा तथा निषिद्धा तथापि पूर्वेद्युः॥तृतीयायाऽप्रस्तावे पूर्वविद्धैव ग्राह्या यद्यपि मुहूर्तत्रयमंतरेण तिथौ ग्राह्य वंना
तथापि गौरीव्रते मुहूर्तमात्रवर्तिन्यपि परतिथौ ग्राह्या तु शुद्धाधिकायां यद्यपि पूर्वतिथिः स्पृष्टा तथापि गौरीव्रते परैव ग्राह्य
॥चतुर्थ्यां विशेषमाह॥चतुर्थी परे पोष्या गणनाथव्रतस्य तु॥मध्याह्नव्यापिनी पूज्या तद्दिने नागचतुर्थ्यपि॥परेद्युर्वे

मध्याह्नव्याप्तौ विघ्नस्य सोत्तरा ॥ पञ्चम्यानुपूर्वविद्धैव मातृयोगप्रशस्तितः ॥ पूर्वेद्युरेव तद्व्याप्तौ पूर्वा सप्यप्रियातिथिः ॥ कु
लाख्यस्य पंचम्यायोगात्पंचमशस्यते ॥ गौर्या तुर्ग्रु जयाप्यस्तु नागविद्धा निषिध्यते ॥ इति ॥ विनायकव्रतनामव्रतव्यातिः
षु चतुर्थी परैवोपाख्यातयोस्तु व्रतयोर्मध्याह्नव्याप्त्या निर्णयः ॥ तत्रापि षट्पक्षान्विविच्य परेद्युरेव व्याप्तिरित्युक्ति
न्पक्षे गणेशव्रतं परदिने कार्यं इतरेषु पंचसु पूर्वदिने कुर्यात् ॥ पूर्वेद्युरेव मध्याह्नव्याप्तिरित्यस्मिन्पक्षे नागव्रतं पू
र्वदिने कार्यं पक्षांतरे परदिन इति विवेकः ॥ पंचम्यां तु विशेषमाह ॥ ॥ सर्वत्र पंचमी ग्राह्या पूर्वा स्कंदव्रते परे
॥ षष्ठ्यां तु विशेषमाह ॥ नागविद्धा स्कंदषष्ठी सा निषिद्धा व्रतांतरे ॥ उत्तरस्या [illegible]स्तावे तु नागविद्धापि गृह्यतां ॥
विनाद्वादशनाडीस्तिर्नागदोषो वेधेन दोषकृदिति ॥ स्कंदव्रतषष्ठी पूर्वविद्धा ग्राह्या पञ्च पञ्चमीवेधो द्वादशनाडीस्ती
तिः संपद्यते ततोन्यूनया पंचम्या वेधेनो दोषो नास्ति ॥ सप्तम्यां विशेषमाह ॥ ॥ सप्तमी पूर्वविद्धैव व्रतेषु निखिलेष्व
पि ॥ ह्य पलाव पूर्वविद्धायाः परविद्धापि गृह्यतामिति ॥ अष्टम्यां विशेषमाह ॥ व्रतमात्रेऽष्टमी कृष्णा पूर्वा शुक्लाष्टमी परा
ह्वीयाष्टमी तु शुक्लापि पूर्वविद्धा विधीयते ॥ पक्षद्वयेप्पुनरेव शिवशक्तिमहोत्सवे ॥ ज्येष्ठर्क्षयोगसूक्ष्मापि ग्राह्यत
ज्येष्ठाव्रते तिथिः ॥ मध्याह्नादूर्ध्वं मिश्रं चेत्परेद्युः साप्रशस्यते ॥ जोष्टमी ताभुवारास्यां युक्ताष्ट[illegible]तिदुर्लभेति

॥ष्टमीव्रतेषु सामान्येन शुक्लपक्षपक्षास्यां निर्णयः ॥ दूर्वाष्टमीव्रते तु शुक्लपक्षो प्रयोजकः ॥ शिवशक्तिमहो
त्सवव्रते कृष्णपक्षो प्रयोजकः ॥ ज्येष्ठानक्षत्रमुपजीव्य ज्येष्ठाव्रतं विहितं तत्र परेद्युर्यदा ज्येष्ठानक्षत्रयोगः तदा
शुक्लपक्षप्रयुक्तैव परतिथिर्गृह्यते यदा तु पूर्वेद्युर्नक्षत्रयोगस्तदा शुक्लपक्षीयुक्तिमुपेक्ष्य पूर्वा विद्धा ग्राह्या ॥ स्ये
व नक्षत्रयोगाद्यदि परेद्युर्मध्याह्नादूर्ध्वमनुवर्तते तदा पूर्वदिनरात्रौ नक्षत्रयोगं विद्यमानमुपेक्ष्य परदिनमेव ग्रा
ह्यं ॥ यदा त्वनुवारयोगस्तदा पूर्वेद्युः रात्रौ नक्षत्रयोगं परेद्युर्मध्याह्नादूर्ध्वं नक्षत्रयोगमुपेक्ष्यानुवारयुक्ता ॥ पा
त्रयोग पादर्तव्यः ॥ ॥ पप जयंतीजन्माष्टमीव्रतयोस्तिथिनिर्णयं तु परमतासिद्धं व्रते कथमपवदति ॥ ॥ ॥ जै
जयंत्याख्यं व्रतं भिन्नं कृष्णजन्माष्टमीव्रतात् ॥ इति जन्माष्टम्या प्यवांतरभेदानाह ॥ शुद्धा च सप्तमी विद्धा त्यवे
न्माष्टमीव्रतविधाने सप्तमी च त्रिंशीयामा विद्धा शुद्धान्यथा त्ववेदिति ॥ सूर्योदयमारभ्य निशीथपादबाकुसप्
म्या कियत्यपि योगस्त्वष्टमी विद्धोच्यते ॥ तयोर्विद्धशुद्धयोर्निर्णयमाह ॥ शुद्धायां नास्ति संदेहो विद्धा च वि दि
धेष्यते ॥ निशीथयोगः पूर्वेद्युः परेद्युर्वा द्वयोरुत ॥ पूर्वैव प्रथमे पक्षे परैवोत्तरपक्षयोरिति ॥ जयंत्याः स्वरूप
मवांतरभेदसहितमाह ॥ ष्टमी रोहिणीयुक्ता जयंती सा च तु र्विधा ॥ शुद्धा च शुद्धाधिके त्येवं विद्धा वि

शांक्या

नित्यं काम्यं चैकादशीव्रतमिति॥ जन्माष्टमीव्रतस्याकरणे प्रत्यवायः स्मर्यते। ननु अनुष्ठाने फलविशेषश्रु
व्रतस्य तु अत्ययमपि स्मर्यते नित्यत्वं काम्यत्वं चेत्याकारद्वयमस्ति तदेकादशीव्रतस्यापि अत्ययस्मरणाद
कारद्वयं द्रष्टव्यं॥ अधिकारिभेदेन तिथिविशेषनिर्णेतुं दशमीवेधस्य द्वैविध्यमाह॥ ॥ अरुणोदयवेधोत्र
वेत्रः सूर्योदये सति॥ उक्तो द्वेधा दशमीवेधो वैष्णवस्मार्तकौ यो यः क्रमात्॥ तिथ्यंतराणामिवात्र वेधेन नियमो
नास्तीत्याह॥ कलाकाष्ठादिवाधेऽपि ग्रास्यात्र त्रिमुहूर्तेवदिति॥ विष्णुलोके सर्वत्र साधारणत्वादरुणोदय
वेधाधिकारी कीदृशो वैष्णव विवक्षितइत्याह॥ वैष्णवानेसाध्यागमोक्तदीक्षांप्राप्तो हि वैष्णवः इति॥ तादृशं
प्रति तिथिनिर्णयमाह॥ ।विद्धात्याज्या वैष्णवेन शुद्धायाधिक्यसंभवे। एकादशी द्वादशी वाधिका चेत्त्य
ज्यतां दिनं पूर्वं यथा स्वेन्नूतरंस्यादिति वैष्णवनिर्णयः॥ ॥अरुणोदये दशमीयुक्तां विद्धांतद्वर्जितां शुद्धांतांप
रित्यज्य परेद्युरुपवासः शुद्धायामपि यदि परेद्युरेकादशी अतिरिच्यते॥ अपनतिरेकेपि यदि ततः परेद्युर्द्वादशी
अतिरिच्यते॥ तत्रोत्सवयत्र शुद्धायामपि परित्यज्य परेद्युरेवोपवासः॥ ॥स्मार्तप्रति निर्णयमाह॥ ॥एकादशी

द्वादशी चेत्पुनस्त्वयं वर्द्धते यदा॥ तदा पूर्वदिनं त्याज्यं स्मार्तैर्ग्राह्यं परं दिनं॥ एकादशीमात्रवृद्धौ गृहियत्या व्यवस्थि
तिः॥ उपोष्या गृहिभिः पूर्वा यतिभिस्तूत्तरा तिथिः॥ द्वादशीमात्रवृद्धौ तु शुद्धा विद्धा व्यवस्थिते॥ शुद्धा पूर्वोत्तरा वि
द्धा स्मार्तनिर्णय ईदृशः इति॥ ॥यथोक्तनिर्णयस्यापवादमाह॥ ॥श्रवणेन युता चेत्स्यात् द्वादशी सा हि
वैष्णवैः। स्मार्तैश्चैवोपोष्या स्यात् त्यजेदेकादशीं तदेति॥ व्रतांतरेषु निर्णयमाह॥ ॥उपवासव्रतादन्यव्रतेषु
द्विमुहूर्तकैः॥ सप्तमी दशमी विद्धामेतामेकादशीं त्यजेत् इति॥ परविद्धा ग्राह्येत्यभिप्रायः॥ ॥द्वादशी नि
यमाह॥ ॥द्वादशी पूर्वविद्धैव व्रतेषु निखिलेष्वपि॥ त्रयोदशी निर्णयमाह॥ ॥शुक्लात्रयोदशी प्र
श्री परालग्नात्रयोदशी॥ पूर्वापरालग्नात्रयोदशी॥ प्रलावे सापि पूर्वैव परानंगवै त्रयोदशी॥ यातु कागस
श्लाघ्या ग्राह्यतां सापराह्णकीति॥ शुक्लत्रयोदश्यपाः पूर्वविद्धायाः स्वीकार्यत्वेपि पराह्नस्पर्शित्वे परविद्धा
म लग्नत्रयोदश्यपाः परविद्धायाः स्वीकार्यत्वेपि परेद्युर्मुहूर्तत्रयात्मत्वे पूर्वविद्धा ग्राह्या॥ अनंगत्रये

२०

कतिच॥ तत्र प्रथमे पक्षे तृतीयपक्षे च संदेहो नेत्येव दर्शयति॥ तुष्टायामपि विद्धायां न संख्याव्याप्त रात्रिः॥ द्वि
।द्वितीयपक्षस्यावांतरभेदं निर्णेयं चाह॥ तुष्टायां कृत्स्नयोगः स्यादेकस्मिन्वा दिनद्वये नैकयोगस्तिसंदेहो
योगप्रथमं दिनमिति॥ पूर्वेद्युरेव न[illegible]क्षत्रयोगः परेद्युरेव नक्षत्रयोगस्तु नयोरेकदिनपक्षयोर्योगवत्ता एव तिथे
ग्रास्यवानाभेति संदेहं दिनद्वये नैक्षत्रयोग इत्यस्मिन्पक्षे पूर्वा तिथिर्ग्राह्या न क्षत्रयोगस्यावांतरभेदास्तु तिथि
र्नयोपयुक्ता न त्वं त्पतीत्याह॥ सदा निशीथपश्चार्द्धव्यापुनमो मध्यमोधमः॥ योगस्त्रिधापि पूर्वेद्युः संपूर्णस्य वा द्वयो
ण॥ तुष्टाधिकायां पूर्वदिने सूर्योदयप्रवृत्तो नक्षत्रयोगः परेद्युरुदयपर्यंतमनुवर्त्तते यस्यायमुत्तमो योगः
यमानस्य प्रवृत्तो मध्यमः॥ निशीथादूर्द्ध्वं प्रवृत्तो धमः॥ एते त्रयोपि फलतारतम्यायैवोपयुज्यंते॥ उपवासस्तु त्रिवि
प्रकारेष्वपूर्वत्रैव चतुर्थस्तेदस्यावांतरभेदं निर्णेयं चाह॥ विद्धाधिकायामप्येकदिने योगे संग्रहस्तंतो॥ द्वयो
गस्त्रिधा लिन्नाग्निशीथे वर्त्तिसदतः॥ तद्व्याप्तिर्दिन एकस्मिन्नुत्तयोरिति॥ एकस्मिन्नेव तु दिनं स्यात् पक्षयोः प
ग्रापीति॥ पूर्वेद्युरेव कानक्षत्रयोग इत्येतयोः पक्षयोः पूर्वेवयोगवत्वव्याप्त्या दिनद्वये योग इत्येकस्मिन् वि
६ अप्ति घेत॥ पूर्वोत्तरयोर्दिनयोर्मध्ये एकस्मिन्दिने निशीथयोग इति प्रथमः पक्षः॥ दिनद्वये निशी

इति। द्वितीयः पक्षः। उक्तयत्र निशीथयोगो नास्तीति तृतीयः पक्षः॥ तेषु प्रथमपक्षे निशीथवतीग्राह्या इतरयोः पक्ष
योः परेद्युर्ग्राह्या वारयोगस्तु विशेषस्तु फलाधिक्यायैवोपयुज्यते॥ ननु तिथिनिर्णयायेत्यत आह॥ ॥बुधे सोमे जयंती चेत्। वार
योगेः फलप्रदा इति॥ पारणाकाले विधा। विस्तरपदर्शयति॥ तिथिनक्षत्रयोरंते उक्तमेव पारणं लवेत्॥ एकस्यांतेमध्यमं
सर्वांते धर्मं स्मृतमिति। जन्माष्टमी जयंत्योर्यथोक्तनिर्णयानुसारेण कदाचिदुपवासद्वयं प्रसज्येतत्यादिवाच्यंत
इति॥ यस्मिन्वर्षे जयंत्याख्यो योगो जन्माष्टमीव्रतं॥ पतल्लुप्ता जयंत्यास्यात् रूपयोगप्रशस्तितः॥ अष्टमी रोहिणी
योगस्तावे जन्माष्टमीव्रतमनुष्ठेयं ननु जयंतीव्रतं सत्यपि तु योगे पूर्वोक्तनिर्णयानुसारेण यदि कदाचिदेकस्मिं
न्दिने व्रतमाप्नुयात्॥ तदानीमुपवासस्यैकेनानुष्ठेयं वा तन्नास्ति उपवासद्वयप्रसक्तिः॥ यदा तु यथोक्तनिर्णया
नुसारेण जन्माष्टमी पूर्वदिने नक्षत्रयोगस्तु परदिने तदा तु जन्माष्टम्याः पूर्वनिर्णयमुपेक्ष्य नक्षत्रयोगवशात्
परदिन एवानुष्ठाने सति नोपवासद्वयप्रसक्तिरिति॥ ॥नवमीदशम्योर्निर्णयमाह॥ ॥नवमी पूर्वविद्धैव पर्वे
याः रूक्तयोरपि॥ कृष्णापूर्वोत्तरा तु स्यादशम्येवं व्यवस्थिता इति॥ एकादशीनिर्णयं तु मादौ तत्स्वरूपमाह॥ जयंतीव्र

दशीव्रते शुक्लापक्षगता परविद्धा ग्राह्या ॥ ॥ चतुर्दशी निर्णयमाह ॥ ॥ चतुर्दश्युत्तरा शुक्ला पूर्वा कृष्णा चतुर्द-
शी । उदये द्विमुहूर्तापि ग्राह्यानंतव्रते तिथिः ॥ शुक्लापि रात्रियुक्ता चैत्रस्य चैत्रश्रावणमासयोः ॥ शुक्लादिसप्तरे तेतद मे
पूर्वैव यदि स्याद्दशाह्निकीति ॥ व्रतांतरेषु उदये त्रिमुहूर्तव्यतो शुक्लचतुर्दशी परविद्धा ग्राह्या ॥ नंतव्रते तत
स्ति मुहूर्तत्रयनियमः ॥ चैत्रश्रावणयोः शुक्लचतुर्दशी परदिने द्वयामपि परित्यज्य रात्रियुक्तां गृह्णीयात् ।
सर्वेष्वपि मासेषु पराह्णस्पर्शोऽस्ति शुक्लचतुर्दशी पूर्वविद्धैव ग्राह्या ॥ ॥ शिवरात्रिनिर्णयमाह ॥ ॥ प्रदो-
निशीथे वा द्वयोर्वा यास्ति सास्त्येव तु ॥ शिवरात्रिव्रते तत्र द्वयोः सन्नाव्रग्राह्यते ॥ तदभावे निशीथैकव्यापिनी पिप
गृह्यतां ॥ तस्याभावे तु वेग्राह्या प्रदोषव्यापिनी तिथिरिति ॥ उभयव्याप्तिरुत्तमा निशीथमात्रव्याप्तिर्मध्यमा प्र-
दोषव्याप्तिरधमा पारणे तु इति ॥ यन्न्यायमतिदिशति ॥ ॥ तिथ्यंते पारणं याम त्रयादर्वाक् समापने ॥ ॥ पन्यथा
पारणं प्रातरेवान्यतिष्वुपवासवदिति ॥ ॥ व्रतविषयं पंचदशी निर्णयमाह ॥ ॥ पूर्वविद्धैव सावित्रीव्रते
पंचदशी तिथिः ॥ नाज्ञायां दर्शभूतस्य स्पृष्टे तु परेहनि ॥ व्रतांतराणि सर्वाणि परेह्न्येव सदेति ॥ पूर्वे

घुरव्यादशनाडीपरिमितापञ्चदशी यदि विद्यते। तत्र सावित्रीव्रतमपि परेद्युरेव कर्तव्यं॥ प्रत्याब्दिकनिर्णयं द
र्शश्राद्धेति दिशति। श्राद्धे पराह्णकालीनो दर्शः प्रत्याब्दिकवन्मतः॥ दिनद्वयेप्येकदेशव्याप्तौ ग्राह्यो महत्त्वतः॥
तुल्यत्वं चेदेकदेशोदयपूर्वोन्य एवोत्तरः॥ कृत्स्नव्याप्तौ द्वयोरह्नोरुत्तरस्तिथिवृद्धितः॥ स्वाम्यं साग्निव्यवस्थास्या
न स्याच्चेदापराह्णयोः॥ पूर्वेद्युः साग्निकः कुर्यात् परेद्युर्निरग्निक इति॥ प्रत्याब्दिकोल्लिखितस्यापि निर्ण
यस्य स्पष्टावधिः॥ पुनरुपन्यासः। साम्यमनग्निव्यवस्था तु प्रत्याब्दिकाद्विशिष्यते॥ इति॥ ॥इष्ट्यर्थनिर्णयमा
ह॥ पूर्वप्रतिपदोः संधिर्मध्याह्ने वा ततः पुरा॥ अन्वाधानं तु पूर्वेद्युर्यागः संधिदिने भवेत्॥ ऊर्ध्वं मध्याह्नतो य
संध्यावन्वाधानं हि तद्दिने॥ इष्टिं परदिने कुर्यादन्यो वाजसनेयिनः॥ यस्तु वाजसनेयी स्यात्तस्य सं
द्दिनात्पुरा॥ न काप्यन्वाहितिः किंतु सदा संधिदिने हि सा॥ संधिश्चेत्संगवादूर्ध्वं प्राक् पर्यावर्तनाद्रवेः॥
पूर्णिमासी तु विज्ञेया सद्यस्कालविधौ तिथिरिति॥ ॥संधिनिश्चये किंचिद्विशेषमाह॥ ॥वृद्धिप्रतिप
दो या तु तदर्द्धं पर्वणि निक्षिपेत्॥ क्षयस्यार्द्धं तथा हित्वा संधिर्निर्णीयतां सदेति॥ यदा घटिकान्यूनमध्य

र्वसमाप्यते। परेद्युश्च घटिकचतुष्टयं वृद्धिवशात् मध्याह्नादूर्ध्वमपि घटिकात्रयं प्रतिपदमनुवर्त्तते तदानीं प्रतिपदो घटिकाचतु
यवृद्धेरूर्ध्वं घटिकाद्वयं पूर्वस्मिन् पूर्वाणि प्रक्षेपणीयं॥ सति पूर्वेद्युर्मध्याह्नादूर्ध्वं घटिकाद्विपर्वानुवर्तितं संभवति॥ एवं सत्यनुष्ठे
२ महान् विशेषोस्त्वेतु॥ वृद्धिप्रक्षेपात्प्रागेव पूर्वेद्युरन्वाधानं संधिदिने चेष्टिः॥ वृद्धिप्रक्षेपेनु संधिदिनेन्वाधानं परेद्युरिष्टि
विशेषः॥ =एतेनैव न्यायेन क्षयपक्षेप्युदाहरणीयः॥ सयदा मध्याह्नादूर्ध्वं घटिकामात्रं पर्वानुवर्त्तते परेद्युर्घटिकाचतुष्टयं प्रति प
द्यतेतदानीं क्षयस्योर्ध्वं प्रक्षेपनीयं तथा सति घटिकान्यूने मध्याह्ने संभवति। तत्र स्वाशाखिकानुसारेण संधिदिनेन्वाधानं प्राप्नो
यप्रक्षेपानुसारेणेष्टिः संधिदिन इति विशेषः॥ =आश्वलायनादिमतेन दर्शश्राद्धमिष्टिवन्निर्णीयमतोतरेण निर्णयमाह हेः वै
मृतेनैव दर्शश्राद्धमिष्टिर्विशिष्यते॥ द्वितीयास्त्रिमुहूर्त्तास्त्वेव प्रतिपद्यापराह्णकी॥ =अन्वाधानं चतुर्दश्यां दर्शे स्वल्पेपि वर्तयेत्॥ दर्शोप
तथाकार्यमिति बोधायनोदितमिति। प्रतिपद्दिने सूर्यास्तमयादर्वाक् त्रिमुहूर्त्ता द्वितीया यदि स्यात् तदा सा प्रतिपद्दिष्टियोग्यान्य
तितदा पूर्वेद्युरिष्टिरिति॥ तदा पूर्वेद्युः श्राद्धान्वाधाने विकृतौ विशेषमाह॥ ॥इत्यादि विकृतिः सर्वापर्वण्येवेति निर्णय इति॥ दर्शपू
र्णमासेष्टिः प्रकृतिस्तद्विषयो निर्णयः पूर्वमभिहितः॥ ऐन्द्राग्नमेकादशकपालं निर्वपेदित्यादिका विकृतिः सा पर्वण्येवा
ष्ठेया। ननु प्रकृतिवत् प्रतिपद्यनुष्ठेया एवं विकृतिश्चोभयपक्षः पक्षसाम्ययोरपि पर्वण्येवानुष्ठानं तद्वचनं प्रकरणान्तर प्रति पा
संगच्छति॥ पंचमेतु प्रकरणे पूर्वोद्दिष्टादिनिर्णयः॥ उत्तरार्द्धे कालभेदात्कर्मभेदापदेशनमिति॥ ॥पंचमप्रकरणस्य

रविभागेन तत्र प्रकरणे धर्मसंक्रांतिग्रहणकालानिर्णीताः॥ उत्तरभागे तु युगादिमन्वादिप्रभृतिकालविशेषस्वरूपं त=
दुत्तद्व्यश्राद्धदानादि निरूपितं॥ ॥तत्र नक्तव्रतनिर्णयमाह॥ ॥यस्मिन्नस्तमियाद्भास्वांस्तन्नक्तमुपोषणे॥ मुख्यं तस्यासंभवे तु
३ गृहीतव्येन निशी प्रयुक्त॥ उपवासे यदुक्तं स्यात्तद्दिनैकैकभक्तयोः॥ उदये त्रिमुहूर्त्तस्थं नक्तं व्रतदानयोः। दिनद्वये तथा वेत्
पूर्वस्याह्नवन्तरे॥ श्रवणं तु तत्रैवाशस्यमुपाकरणकर्म्मणि॥ पित्र्ये तु तिथिवत्सर्वो नक्तव्रतस्य विनिर्णयः। इति॥ विष्कुलादि
प निर्णयमाह॥ पूर्वस्यादुपवासादावुत्तरो व्रतदानयोः योगः श्राद्धकर्म्मकाले व्याप्तेषु परिगृह्यतामिति॥ ॥ववबालवकादि
[illegible]स्य निर्णयमाह॥ ॥करणं यद्दिने तत्तु ग्राह्यं रात्रौ यदा तदा दिनद्वयैकभक्तास्यामुपवासः प्रसिद्ध्यती)ति।।वारविषयेनि
सितव्या सावं दर्शयति वारेषु संसेयास्त्वावातुगृहीतव्यं यदा स्थितमिति॥ ॥संक्रांतिनिर्णयमाह॥ ॥=आसन्ननाड्यः संक्रां[illegible]
पुण्याः स्नानादिकर्म्मसु॥ चरेषु कर्कटे पूर्व्वा मकरे विंशतिः परा॥ वर्त्तमाने तुला मेषे नाड्यस्तूभयतो दश॥ तु षष्टा[illegible]
ण्याः प्राक्पश्चादपि षोडश॥ मिथुनादौ द्विस्वभावे उत्तराः षष्टिनाडिकाः इति संक्रांतिकालस्य यावत् यावत्प्रत्यासत्ति[illegible]
वत्तावत् पुण्यातिशयोऽवगन्तव्यः॥ मेषादिचतुर्षु राशित्रिकेषु प्रथमाश्चराः स्थिरा मध्यमाः। स्थिरा उत्तरा द्विस्वभावाः॥ ते[illegible]
सर्वेषु यथोक्तया विंशत्यादिसंख्यया पुण्यकालावधिरभिधीयते॥ यथोक्तस्य सामान्यस्य कंचिदपवादमाह॥ ॥=अपरा[illegible]
[illegible]णरात्रावनुष्ठाननिषेधतः॥ उक्तौ कालौ व्यवस्थाप्यौ तद्दशात्पूर्वपश्चिमाविति॥ यदा कर्कटसंक्रांतिरुदयानं तु

रविवति। तदा पूर्वासां विंशति घटिकानां पूर्वकालत्वात् पूर्वोक्तन्यायेन रात्रावनुष्ठानं प्राप्तमतस्तत्परित्यज्य त तन्
त्पनाड्यो ग्रहीतव्याः। यदा संगवमध्याह्नादिकालेषु कर्कटसंक्रांतिस्तदा दिवस एव पूर्वनाडीष्वनुष्ठातुं त्राव
नाडी प्राशस्त्यं तत्र च विरोधोऽपनेनैव न्यायेन सर्वसंक्रमणेषु यथायथा दिवस एवानुष्ठानं संभवति तथा पूर्वोत्त
वस्थापनीय रात्रिसंक्रमणे विशेषमाह॥ ॥रात्रौ संक्रमणे स्नानं ह्दिनार्द्धे स्नानदानयोः॥ अर्द्धरात्रादधस्तस्मि
परि क्रिया। ऊर्द्ध्वं संक्रमणे चोर्द्ध्वं उदयात्प्रहरद्वयं पूर्णं चेदर्द्धरात्रो च यदा संक्रमते रविः॥ प्रादुर्द्दिनद्वयं
मकरकर्कटाविति॥ रात्रौ द्वितीयप्रहरस्यांत्यघटिकातस्तृतीयप्रहरस्य च प्रथमघटिकोपर्वं च घटि[illegible]त॥ वार। बषयोनि
रात्रकः। तस्मादर्द्धरात्रादधः संक्रमणे सति। पूर्वदिने मध्याह्नस्योपरि प्रहरद्वयं क्रिया कार्या॥ अन्न नाडश्च [illegible]
सति उत्तरकालानां दूर्ध्वं यामद्वयं पुण्यं पुर्वे अर्द्धरात्रे पुण्ये यथोक्ते घटिकाद्वये संक्रांतौ पूर्वोत्तरादिन [illegible] संति
शेषमाह॥ ॥कर्कटमकरे रात्रावप्याचारादनुष्ठितिरिति। शिष्टाचारस्तत्र प्रमाणमित्यर्थः॥ ॥ग्रहणे [illegible] नि
पूर्णिमा प्रतिपत्संधौ राहुः संपूर्णमंडलं ग्रसेत चंद्रमर्कं च पर्वप्रतिपदंतरा॥ ग्रस्यमाने भवेत्स्नानं ग्रस्ते हो
यते॥ मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीयते॥ सूर्यग्रहे तु नाश्नीयात् पूर्वं यामचतुष्टयं चंद्रग्रहे तु याम
[illegible] तातुरैर्बालैरिति॥ ॥बालानां विशेषमाह॥ ॥अपराह्णे न मध्याह्ने मध्याह्ने न तु संगवे। भुंजीत संगवे

पूर्वे माचरेत्॥ पंचधा बिलं क्वि हि वसे ग्रहणस्तागे परतो ह्य पूर्वे स्तागे व नमुंजीते त्य र्थः॥ ॥ग्रस्तोद यं तं
माह॥ ॥ग्रस्तोदये विधोः पूर्वं नाहर्भो जनमाचरेदिति। ग्रस्तावेवास्तमानं च रवी वदू प्राप्नुतो
परेद्युरुदये स्नात्वा स वहरेन्नरः॥ ॥तदेवं निर्णीतमर्थं ग्रहणे नानुक्रम्य संग्रहमुपसंहरति। इदं निर्णी
विवरतु मितो घृतः॥ ॥ ॥इति माधवीयस्तिथिनिर्णयः समाप्तः॥ ॥ ॥उपवासेषु वाल्लेव कादि
णं लवेत्॥ अन्यथा तत्फलसार्द्धं धर्म्ममेवापसर्प्यति॥ ॥देवलवाक्यं॥ ॥निगमे पूर्वे विद्वा॥ वारविषयेनि
वणं बिना॥ उपोष्य विधिवत्कुर्यान्न दंते तु पारणं॥ ॥स्कंदे॥ ॥तिथीनामेव सर्वासामुपन्नना
तेपारणं कुर्यात् बिना त्रिकचतुर्द्दशीं॥ ॥धर्म्मदीपिकायां स्मृतौ॥ ॥तिथ्यंते चैव स्तां तेव पारणा
यामत्रयोर्द्धं वर्तिन्यां प्रातरेव हि पारणाम्॥ ॥तुलं लवतु॥ ॥गोपालाय नमः॥ ॥ ॥ ॥

१५ १५